# RASHTRIYA SANSKRIT VIDYAPEETHA

(Deemed University)
TIRUPATI – 517 507.

F.No. RSV/Estt./AISTC/2019 Dated : 30th May, 2019

**OFFICE ORDER**

Sub : R.S.Vidyapeetha – Establishment – Constitution of Committee for the conduct of All India Shastrartha Training Camp (AISTC) from 31.05.2019 to 15.06.2019 – Orders – Issued – Regarding.

Ref : Note order of the Vice-Chancellor dated

***

The Vice-Chancellor is pleased to constitute the following committee for the conduct of All India Shastrartha Training Camp (AISTC) from 31.05.2019 to 15.06.2019 at Rashtriya Sanskrit Vidyapeetha, Tirupati.

| | | |
|---|---|---|
| 1. Prof. M.L.Narasimha Murthy<br>Department of Advaita Vedanta | : | Chairman |
| 2. Prof. J. Ramakrishna<br>Department of Vyakarana | : | Deputy Chairman |
| 3. Prof. O.S.Ramalala Sarma<br>Department of Nyaya | : | Co-ordinator |
| 4. Prof. G.S.R.Krishna Murty<br>Department of Sahitya | : | Co-ordinator |
| 5. Dr. K.Ganapathi Bhat<br>Department of Advaita Vedanta | : | Co-ordinator |
| 6. Dr. K. Viswanatha<br>Department of Advaita Vedanta | : | Co-ordinator |
| 7. Dr. Narayana<br>Department of Dvaita Vedanta | : | Addl. Co-ordinator |
| 8. Dr. O.G.P.Kalyana Sastry<br>Department of Sabdabodha | : | Addl. Co-ordinator |
| 9. Sri. Yashaswee<br>Department of Vyakarana | : | Addl. Co-ordinator |

REGISTRAR i/c

To
All the concerned

Copy to
The Co-ordinator, All India Shastrartha Training Camp, Rashtriya Sanskrit Sansthan, New Delhi
For favor of information.
All Deans of Faculties
Head Department of Vyakarana, Advaita Vedanta, Dvaita Vedanta, Nyaya.
The D.R. & F.O. i/c., RSV.
The Assistant Registrar (F&A), RSV.
PS to Vice-Chancellor/Registrar, RSV.
Personal Files, OO file.

# अखिलभारतशास्त्रार्थप्रशिक्षणवर्गः – 2019

# कार्यक्रमप्रतिवेदनम्

(राष्ट्रियसंस्कृतसंस्थानस्य वित्तसाहाय्येन समायोजितः)

## ALL INDIA SASTRARTHA TRAINING CAMP – 2019

**(Organized from 31-05-2019 to 15-06-2019 with the financial assistance of Rashtriya Sanskrit Sansthan, New Delhi)**

# A REPORT

# RASHTRIYA SANSKRIT VIDYAPEETHA

*University Established. u/s. 3 of UGC Act, 1956 under MHRD, Govt of India*

*Reaccredited at 'A' Grade by NAAC with a CGPA of 3.71*

## TIRUPATI, ANDHRA PRADESH – INDIA 517507

# अखिलभारतशास्त्रार्थप्रशिक्षणवर्गः - 2019

## राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

## Report



राष्ट्रियसंस्कृतविद्यापीठेन अनेन 2000, 2003, 2017 एवं 2018 वर्षेषु प्रचालितः अखिलभारतशास्त्रार्थप्रशिक्षणवर्गः अस्मिन्नपि 2019 वत्सरे प्रचालनीयः इति कुलपतिप्रमुखाः ज्येष्ठाः निरणैषुः। तदर्थं कुलपतीनां आचार्य.वि.मुरलीधरशर्मणां मार्गनिर्देशने समायोजनसमितिः आयोजिता। अनया समित्या सर्वे संस्कृतविश्वविद्यालयानां सूचना प्रदत्ता। आचार्य, विशिष्टाचार्य, शोधच्छात्राणां अभ्यर्थनपत्राणि प्रायः 110 सम्प्राप्तानि। तेषु 80 छात्राः प्रवेशपरीक्षार्थम् उपस्थिताः। प्रवेशपरीक्षा च 31-05-2019 दिनाङ्के शिक्षाशास्त्रिभवने सञ्चालिता। 1. न्याय, 2. व्याकरण, 3. पूर्वमीमांसा, 4.ज्यौतिष, 5.

साहित्य, 6. अद्वैतवेदान्तशास्त्रेषु छात्राः प्रवेशपरीक्षामलिखन्। तेषु 64 छात्राः तेषु तेषु शास्त्रेषु भागं ग्रहीतुं चिताः।

अस्य कार्यक्रमस्य उद्घाटनकार्यक्रमः 31-05-2019 दिनाङ्के आर्. आर्. मुखर्जि सभाङ्गणे सञ्चालितः। वैदिकमङ्गलाचरण-दीपप्रज्वलनाभ्यां कार्यक्रमः प्रारब्धः।




वर्गस्यास्य समायोजकाः आचार्याः आचार्य.ओ.श्रीरामलालशर्माणः वर्गस्यास्य उद्देश्यानि विवृत्य सर्वेषां स्वागतं व्याहृतवन्तः।


राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः
अखिलभारतशास्त्रार्थप्रशिक्षणवर्गः - 2019
01-06-2019 तः 15-06-2019 पर्यन्तम्

श्रीमन्तः **महामहोपाध्याः विश्वनाथ गोपालकृष्ण शास्त्रि महोदयाः** अस्य कार्यक्रमस्य मुख्यातिथयः भूत्वा व्याकरणशास्त्रे वाक्यार्थं कृत्वा कार्यक्रमः यशस्वी भूयादिति, छात्राः सर्वे शास्त्रार्थकरणकुशलाः भवेयुरिति च आशिषः अब्रुवन्।

विद्यापीठस्यास्य कुलपतयः **आचार्याः वि.मुरलीधरशर्माणः** कार्यक्रमस्यास्य आध्यक्षम् ऊढ्वा छात्रान् सर्वानपि विद्यासमुपार्जनाय शास्त्रार्थकरणकौशलसम्पादनाय च प्रैरयन्।




अन्ते च **डा.ओ.जि.पि.कल्याणशास्त्रिभिः** धन्यवादाः सर्वेभ्यः समर्पिताः।

तदनु 01-06-2019 दिनाङ्के प्रातः 8 वादने पाठाः प्रारब्धाः। प्रतिदिनं प्रातः 8:00 वादनात् आरभ्य 09:00 वादनपर्यन्तं पाठः। 09:10 वादनमारभ्य 10:10 पर्यन्तं पुनःपाठः/चिन्तनम्। पुनः 10:30 वादनात् आरभ्य 11:30 वादनपर्यन्तं पाठः। 11:40 वादनमारभ्य 12:40 पर्यन्तं पुनःपाठः/चिन्तनम्। भोजनविरामानन्तरं 02:30 वादनात् 03:30 पर्यन्तं पाठः 03:40 वादनात् 04:40 वादनपर्यन्तं पुनःपाठः/चिन्तनम्। 5:00 वादनात् 6:00 पर्यन्तं विशेषकार्यक्रमाः। 6:30 वादनात् 8:00 वादनपर्यन्तं शैक्षिकसास्कृतिककार्यक्रमाः इति प्रधानकार्यक्रमाः आयोजिताः। एवं छात्राणां एकाग्रताभिवृद्धये उषःकाले

5:30 वादनादारभ्य 6:00 पर्यन्तं योगाभ्यास/प्राणायामकार्यक्रमः अपि समायोजितः। सर्वे छात्राः प्रातः 5 वादनात् रात्रौ 10 वादन पर्यन्तं यथा शास्त्रविद्याव्यासङ्गे एव यथा भवेयुः तथा दैनन्दिनी रचिता एवं पालिता च।

15-06-2019 दिनाङ्के स्थिरवासरे सायं 6 वादने वर्गस्यास्य समापनोत्सवः शिक्षाशास्त्रभवने सम्पन्नः। मङ्गलाचरणपुरस्सरमयं कार्यक्रमः प्रारब्धः। अस्मिन्समापनोत्सवे अतिथीनां सर्वेषाम् आचार्याः.ओ. रामलालशर्माणः स्वागतं व्याहरन्। 1.यश्वन्त कुमार त्रिवेदी 2.रमण भरद्वाजः 3.श्रद्धा उपाध्ये छात्राः वर्गेऽस्मिन् स्वीयान् अनुभवान् प्राकटयन्। श्रीमन्तः म.म.डा.मणिद्राविडशास्त्रिणः कार्यक्रमस्य मुख्यातिथिपदं विभूषयन्तः सर्वे छात्राः एतस्मिन् वर्गे शास्त्रार्थकरणाभ्यासश्रमं कृतवन्तः इति सन्तोषं प्रकटय्य एवमेव अग्रेऽपि अयं कार्यक्रमः अनुवर्तनीयः इत्युपादिशन्। सर्वेभ्यः छात्रेभ्यः प्रमाणपत्राणि श्रीकुलपतिभिः मुख्यातिथिभिश्च वितीर्णानि। अन्ते धन्यवादसमर्पणानन्तरं वैदिकेन मङ्गलाचरणेन अयं कार्यक्रमः साधु समापितः।







# अखिलभारतशास्त्रार्थप्रशिक्षणवर्गः



राष्ट्रियसंस्कृतविद्यापीठेनानेन 2000, 2003, 2017 एवं 2018 वर्षेषु प्रचालितः **अखिलभारतशास्त्रार्थप्रशिक्षण-वर्गः** अस्मिन्नपि 2019 वत्सरे प्राचाल्यत । कार्यक्रमेऽस्मिन् भागग्रहणार्थं विविधविश्वविद्यालयेभ्यः शोधच्छात्राणां 110 अभ्यर्थनापत्राणि अप्राप्यन्त । तेषु प्रवेशपरीक्षार्थमुपस्थितेभ्यः 80 छात्रेभ्यः न्याय-व्याकरण-पूर्वमीमांसा-ज्यौतिष-साहित्य-अद्वैत-वेदान्ताशास्त्रेषु 64 उत्तीर्णाः छात्रा चिता अभूवन् । कार्यक्रमस्य उद्घाटनं 31.05.2018 दिनाङ्के आर्.आर्.मुखर्जिसभाङ्गणे अभूत् ।

प्रायेण हि नरेन्द्रश्रीः सोत्साहैरेव भुज्यते (Generally royal fortune is enjoyed by the energatic alone.)





वैदिकमङ्गलाचरण-प्रदीपप्रज्ज्वालनाभ्यां प्रारब्धे उद्घाटनसत्रे वर्गस्यास्य समायोजकाः आचार्याः ओ.श्रीरामलालशर्माणः वर्गस्योद्देश्यानि विवृत्य सर्वेषां स्वागतं व्याहरन् । श्रीमन्तः **महामहोपाध्यायाः विश्वनाथगोपालकृष्णशास्त्रिमहाभागाः** अस्य कार्यक्रमस्य मुख्यातिथिपदं व्यभूषयन्तः व्याकरणशास्त्रे वाक्यार्थं कृत्वा कार्यक्रमः यशस्वी भूयादिति, छात्राः सर्वे शास्त्रार्थकुशलाः भवेयुरिति च आशिषः अब्रुवन् । विद्यापीठस्य कुलपयः **आचार्याः वि.मुरलीधरशर्माणः** कार्यक्रमस्यास्य आध्यक्ष्यम् ऊढ्वा छात्रान् सर्वानपि विद्यासमुपार्जनाय शास्त्रार्थ-करणकौशलसम्पादनाय च प्रैरयन् । अन्ते डा.ओजि.पि.कल्याण-शास्त्रिभिः धन्यवादाः सर्वेभ्यः समर्पिताः ।

तदनु ०१.०६.२०१९ दिनाङ्के प्रातः ८.०० वादने पाठाः प्रारब्धाः । प्रतिदिनं सर्वेऽपि छात्राः एकया निर्दिष्टसमयसारण्या अभिप्रेरिताः प्रातरुत्थानात्प्रारभ्य रात्रिशयनं यावत् नित्यकर्म, अध्ययनम्, मनोरञ्जनम्, वादविवादः, अनुचिन्तनम् इतिदिषु नैकेषु कर्मसु निरता आसन् । शारीरिकसुस्थतायै उषःकाले योगाभ्यासः, प्राणायामः व्यायामः इत्यादीनां प्रशिक्षणमपि प्रदत्तमासीत् ।

१५.०६.२०१९ दिनाङ्के स्थिरवासरे सायं ६.०० वादने वर्गस्यास्य समापनमहोत्सवः शिक्षाशास्त्रभवने सम्पन्नः । मङ्गलाचरणपुरस्सरमयं प्रारब्धेऽस्मिन् कार्यक्रमे अतिथीनां स्वागतं आचार्य ओ.रामलालशर्माणं व्याहरन् । भागग्रहीतृषु **यशवन्तकुमार-त्रिवेदी, रमणभरद्वाजः, श्रद्धोपाध्यायश्च** वर्गेऽस्मिन् स्वीयान् अनुभवान् प्राकटयन् । श्रीमन्तः **म.म.डॉ.मणिद्राविडशास्त्रिणः** कार्यक्रमस्य मुख्यातिथिपदं विभूषयन्तः सर्वे छात्राः एतस्मिन् वर्गे शास्त्रार्थकरणाभ्यासश्रमं कृतवन्तः इति सन्तोषं प्रकटय्य एवमेव अग्रेऽपि अयं कार्यक्रमः अनुवर्तनीयः इत्युपादिशन् । सर्वेभ्यः छात्राभ्यः प्रमाणपत्राणि श्रीपतिभिः मुख्यातिथिभिश्च वितीर्णानि । अन्ते धन्यवादसमर्पणानन्तरं वैदिकेन मङ्गलाचरणेन अयं कार्यक्रमः साधु समापितः ।